International Journal of Jyotish Research: 2021; 6(2): 22-28

International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2021; 6(2): 22-28
© 2021 Jyotish
www.jyotishajournal.com
Received: 08-05-2021
Accepted: 17-06-2021

**डॉ0 शिवाकान्त मिश्रः**
सहायकाचार्यः,ज्योतिषविभागः
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्,
राजस्थानम, भारत

**Correspondence**
**डॉ0 शिवाकान्त मिश्रः**
सहायकाचार्यः,ज्योतिषविभागः
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्,
राजस्थानम, भारत

# अंतरिक्षोत्पातलक्षणानि तेषां फलपरिपाकविचारश्च

**डॉ0 शिवाकान्त मिश्रः**

## प्रस्तावना

त्रिस्कन्धात्मकस्य ज्योतिषशास्त्रस्य संहितास्कन्धे प्राकृतिकानां आपदानां लक्षणानि कारणानि तेषां शान्तिविधानानि च निरूपितानि सन्ति । तत्र का नाम प्रकृति इति जिज्ञासायां प्रकरोति इति ''प्रकृतिः'' । प्र + कृ + ति अर्थात् प्रधानं सत्त्वरजस्तमसां साम्यावस्था सा प्रकृतिरेव । प्रकृतिः सांख्यदर्शनस्य मूलतत्त्वं वर्तते। सा प्रकृतिः नित्य एका तथा सत्त्वरजतमोरूपा त्रिगुणात्मिका । अर्थात् सत्त्वरजस्तमसां साम्यावस्था प्रकृति इति सांख्यशास्त्रविशारदाः स्वीकुर्वन्ति । प्रकृतिः अव्यक्ता, कारणरहिता, अविनाशी, व्यापका, क्रियाहीना, अनाश्रिता, अवयवहीना, सतन्त्राश्च । अस्या एव प्रकृतेर्गुणत्रयाणां वैषम्यावस्था जगदुत्पत्तेः कारणं वर्त्तते । अनेन कथ्यते सृष्टौ प्रकृष्टा या देवी सा प्रकृति । यथोक्तम् [1] –

सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम् ।
साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्तिता ।।
केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः ।
एतदेव प्रजासृष्टिं करोति विकरोति च ।।

अस्याः त्रिगुणात्मिकायाः प्रकृतेः विशेषचर्चा वैदिकवांमये सर्वत्र परिदृश्यते । मैत्रायण्युपनिषदि सत्त्वरजतमगुणानामुल्लेखः प्राप्यते [2] । महाभारतस्य शान्तिपर्वे अव्यक्तप्रकृतेः उल्लेखं प्राप्यते । '' अव्यक्तामाहुः प्रकृतिं परां प्रकृतिवादिनः '' इति [3]। श्रीमद्गीतायाः द्वितीयोऽध्यायेऽपि अस्याः चर्चा समुपलभ्यते । सा प्रकृतिः आत्मा सा इन्द्रियवहिर्भूता, सा अदृश्या च [4] । ज्यौतिषशास्त्रानुसारं प्रकृति नाम ऋतुवशाद् ग्रहाणां गतिस्थित्यादीनां साम्यावस्था। अद्भुतसागरस्य सूर्याद्भुतावर्ते प्रकृत्यादिविवेकविचारावसरे ग्रहाणां स्थितिगत्यानुसारं प्रकृतेः स्वरूपं, गुणदोषादयश्च वर्णिताः सन्ति । तत्र ग्रहाणां ऋतुवशाद् स्निग्धनिर्मलत्त्वगणितागतबिम्बप्रमाणाधिक्यस्फुटविमलामल– दीर्घराशिजालादयो प्रकृतेः गुणाः सन्ति । एतस्माद्विपरीताः दोषाः। गुणदोषरहिता सा प्रकृतिः शुभफलप्रदा । गुणवती प्रकृतिः अतिभुभप्रदा । दोषवती अशुभफलप्रदा। अस्याः प्रकृतेः ''अन्यथाभावः विकारः '' इत्युच्यते भद्रबाहुसंहितायां प्रकृतेः विपर्यासः उत्पातश्च [5]।

## उत्पातः

'उत्पतति अकस्मादायाति यो सो उत्पातः'' [6]। उत् उपसर्गपूर्वकः पत् धातोः घञ् प्रत्यये कृते सति उत्पात इति सिद्धयति । प्राणीनां शुभाशुभसूचकाः उत्पाताः त्रिविधाः भवन्ति भौमान्तरीक्षदिव्यभेदैः । उत्पात नाम प्रकृतेः वैपरित्यस्थितिः । वराहमतेन ''प्रकृतेरन्यत्वमुत्पातः [7] अर्थात् प्रकृतेः स्वभावात् वैपरीत्यं स एवोत्पात इति । भद्रबाहुसंहितायामपि [8]– ''यः प्रकृतिर्विपर्यासः प्रायः संक्षेपतः उत्पातः । पराशरमतेन प्रकृतेः पंचमहाभूतानां तथा प्राणीनां विकारैः उत्पन्नपरिस्थिति उत्पातः कथ्यते । तद्यथा [9]– ''प्रकृतेर्भूतविकृतप्रादुर्भावोश्चोत्पातमाचक्षते ।'' गर्गमतेनापि [10]– प्रकृतेः अन्यथोत्पातः संक्षेपस्तावदीदृश ...। आथर्वणाद्भुतेऽपि [11]– प्रकृतिविरूद्धमपीदं प्राक्प्रबोधाय देवाः सृजन्ति इति । वस्तुतः येन प्रकृत्यां उपद्रवाः जायन्ते ते उत्पाताः । एषां उत्पातानां उत्पत्तिस्थानविषये पराशरेण उक्तं वर्त्तते यत् – पंचमहाभूतानि तेषां द्यौरन्तरिक्षं भूरेतानां चाश्रयभूतानि सन्ति [12]।

## उत्पातोत्पत्तिकारणानि –

उत्पातानां उत्पत्तिलक्षणविषये मत्स्यपुराणविष्णुधर्मोत्तरपुराणयोः मतमस्ति यत् उत्पाताः देवनिर्मिताः । मानवानां पापकर्मवशाद् देवाः अप्रसन्नाः भवन्ति । तेषां अप्रसन्नत्वात् उत्पाताः जायन्ते । यथोक्तम् [13]–

पुरुषापचारान्नियतमपरज्यन्ति देवताः ।
ततोऽपरागाद् देवानामुपसर्गः प्रवर्तते ।।

अपि च बृहत्संहितायाम् [14]–

मनुजानामपचारादपरक्ता देवताः सृजन्त्येतान ।
तत्प्रतिघाताय नृपः शान्तिं राष्ट्रे प्रयुंजीत ।।

त एव सर्वलोकानामुत्पाता देवनिर्मिताः । दैवज्ञानां मतेन मानवानां अतिलोभात्, असत्याचरणात्, नास्तिकात्, अधर्मात्, अपचारात् अप्रसन्नाः देवाः एव उत्पाताः उत्पादयन्ति । तेषां उत्पातानां निवारणाय राजा स्वनगरे शान्तिविधानं कारयेदिति । वसिष्ठसंहितायां तद्यथा [15]–

अन्यत्वं प्रकृतेः यत्तदसावुत्पातसंज्ञकम् ।
अधर्मतस्त्वसत्याच्च नास्तिक्यादतिलोभतः।।
अनाचारा नृणां नित्यमुपसर्गः प्रजायते ।
दिव्यान्तरिक्षक्षितिजविकारा घोररूपिणः ।।

गर्गमतेनापि [16]–

अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्मतः ।
नरापचारान्नियतमुपसर्गः प्रवर्तते ।

अन्येषां मतेन प्रकृतिविरूद्धमपीदं प्राक्प्रबोधायं देवाः सृजन्ति इति उत्पातस्योत्पत्तेः कारणविषये गर्गपराशरादीनामाचार्याणां मतं एकमेव। निष्कर्षरूपेण ज्ञायते यत् पृथिव्यां मानवानां प्रकृतेः विरूद्धाचरणादेवैः प्राकृतिकोत्पाताः उत्पद्यन्ते [17]।

**त्रिविधोत्पाताः**

उत्पाताः त्रिविधाः । दिव्याः, अन्तरिक्षाः, भौमाश्च । दिवि अर्थात् आकाशे उत्पन्नाः उत्पाताः दिव्याख्याः। अन्तरिक्षे उत्पन्नाः आन्तरिक्षाख्याः, एवं भूमौ उत्पन्नाः उत्पाताः भौमाख्याः ।

**भौमोत्पातलक्षणानि**

चराणां वस्तूनां स्थैर्यं स्थिराणां वस्तूनां चरत्वं तदुद्भवं उत्पातं भौममुत्पातमुच्यते । यथोक्तं गर्गसंहितागार्गीयबार्हस्पत्येषु –

भूमावुत्पद्यते यच्च स्थावरे वाथ जंगमे ।
तदैकदेशिकं भौमं भूमिचालाम्बुविक्रिया ।।
चरस्थिरभवो भौमो भूकम्पश्चापि भूमिजः ।
जलाशयानां वैकृत्यं भौमं तदपि कीर्तितम् [18]।।

अपि च बृहत्संहितायाम् –

भौमं चिरस्थिरभवं तच्छान्तिभिराहतं शममुपैति [19]।

भूगर्भीयोत्पातभूपृष्ठीयोत्पातभेदेन भौमोत्पातः द्विविधः । भूकम्पज्वालामुखीभूस्थितचुम्बकीय–क्षेत्रखनिजपदार्थभूगर्भीयजलस्त्रोतादयः भूगर्भीयोत्पाताः सन्ति। भूगोलीयकटिबन्धैः वातावरणे भूपृष्ठीयोत्पाताः जायन्ते। अर्थात् भौमोत्पातनिर्धारणे भूपृष्ठगतपर्वतश्रृंखलानदिसमुद्रहिमखण्डहिमपर्वतवनप्रदेशमरुप्रदेशभूगोलीय–कटिबन्धविभागात्युष्णसमशीतोष्णशीता–तिशीतध्रुवीयप्रदेशभूस्थितचुम्बकीयक्षेत्रस्थानीयवातावरणशीतचक्रवातचक्रतापचक्रभूपृष्ठीयभूगर्भीयसंरचनादयश्च मुख्याः सन्ति। समस्तभूमण्डलसम्बन्धैरुत्पन्नाः उत्पाताः भौतिकाः भौमोत्पाताः।

**दिव्योत्पातलक्षणानि**

सूर्यादीनां ग्रहाणां अश्विन्यादीनां नक्षत्राणां च यद्वैकृतं तद्दिव्यमुत्पातम् । यथोक्तं बृहत्संहितायाम् –

'' दिव्यं ग्रहर्क्षवैकृतम् ''

गर्गाचार्यमतेऽपि–

स्वर्भानुकेतुनक्षत्रग्रहतारार्कजेन्द्रजम् ।
दिविचोत्पद्यते यच्च तद्दिव्यमिति कीर्तितम् ।।[20]

अपि च समाससंहितायाम् –

दिव्यं ग्रहर्क्षजातं....।

मत्स्यविष्णुधर्मोत्तरपुराणयोः मतम् –

दिव्यान्तरिक्षं भौमं तु त्रिविधं परिकीर्तितम् ।
ग्रहर्क्षविकृतं दिव्यमान्तरिक्षं निबोध मे ।।[21]

सौरमण्डलग्रहोपग्रहकेतुनक्षत्रमण्डलसम्बन्धितकुप्रभावाणां विचारः दिव्योत्पातान्तर्गतो भवति। अर्थात् दिव्योत्पातेसूर्यचन्द्रमंगलबुधगुरुशुक्रशनिराहुकेत्वगस्त्यसप्तर्षिध्रुवादयनक्षत्रग्रहयुद्धाकृत्या–दियोगरव्यादिवर्षसंवत्सरर्क्षादिगतोत्पाताः मुख्याः सन्ति।

**अन्तरिक्षोत्पातलक्षणानि**

उल्कापातः, दिग्दाहः, सूर्यचन्द्रयोः परिवेषः, गन्धर्वनगरवृष्टेः विकृतिश्च आन्तरिक्षोत्पाताः सन्ति । यथोक्तं मत्स्यपुराणविष्णुधर्मोत्तरयोः –

उल्कापातो दिशां दाहः परिवेषस्तथैव च ।
गन्धर्वनगरं चैव वृष्टेश्च विकृतिस्तु या ।।
एवमादीनि लोकेऽस्मिन्नान्तरिक्षं विनिर्दिशेत् ।[22]

आचार्यवराहमिहिरेणोक्तं यत् उल्कानिर्घातपवनपरिवेषगन्धर्वपुरपुरन्दरचापादयः अन्तरिक्षोत्पातान् सन्ति [23]। गर्गसंहितागार्गीयबार्हस्पत्ये वायुमेघसन्ध्यादिग्दाहपरिवेषान्धकारगन्धर्वनगरेन्द्रचापं च अन्तरिक्षजा अर्थात् भूपृष्ठात् वायुगोलमध्यगता उत्पाताः । तद्यथा –

वाय्वभ्रसन्ध्यादिग्दाहपरिवेषस्तमांसि च ।
खपुरं चेन्द्रचापं च तद्विधादन्तरिक्षजम् ।।[24]

अर्थात् भूगर्भभूपृष्ठगताः उत्पाताः भौतिकोत्पाताः सन्ति । तदूर्ध्वगताः भूवायुमण्डले उत्पन्नाः उत्पाताः अन्तरिक्षजाः। ततः उर्ध्वगताः सूर्यादीनां ग्रहर्क्षाणां गोलगतानां उत्पातानां दिव्योत्पातसंज्ञा। मत्स्यपुराणविष्णुपुराणधर्मोत्तरपुराणेषु अन्तरिक्षजं उत्पातं नाभससंज्ञकमुक्तम् ।

**उत्पातफलपाकस्थानम्**

दिव्योत्पाताः समस्तसंसारस्य कृते, नाभसोत्पाताः देवानां कृते, भौमोत्पाताः भूपानां कृते च भयप्रदायकाः सन्ति । यथोक्तम् –

दिव्या जगतो देवस्य नाभसाः पार्थिवस्य भूप्रभवाः ।
अनुबध्नन्तो भयदस्न्यहाधिकश्चानिलश्चण्डः ।।[25]

पराशरमते दिव्यान्तरिक्षभौमाद्भुतानां फलं नृप–नृपसुत–राज्ञी–राजकोष–लोकपुर–पुरहित–वाहनेषु च पतति । अत्र न केवलं नृपाणां अपितु मण्डलाधिपानां, गृहस्वामीनां, नगराधिपानां शुभाशुभफलानि उत्पातैः निश्चियते। भौमान्तरिक्षदिव्योत्पाताः उत्तरोत्तराः उपद्रवकारकाः सन्ति। एतेषां उत्पातानां शान्तिविधानानि अपि संहितापुराणादिग्रन्थेषु उल्लिखितानि सन्ति। दैवमुत्पातं राज्ञोऽष्टधा पाकमुपयाति। वराहेण स्वबृहत्संहितायामुक्तं तद्यथा –

आत्मसुतकोशवाहनपुरदारपुरोहितेषु लोके च ।
पाकमुपयाति दैवं परिकल्पितमष्टधा नृपतेः ।।[26]

**गर्गमतेऽपि**

पुरे जनपदे कोशे वाहनेऽथ पुरोहिते ।
पुत्रेष्वात्मनि भृत्येषु प्श्यते देवमष्टधा ।।[27]

त्रिविधेषु उत्पातेषु भौमोत्पातं शान्तिभिराहतं मर्दितुं नाशमुपगच्छति । नाभसमान्तरिक्षं शान्तिभिराहतं मन्दत्वं गच्छति परन्तु दिव्योत्पातं शान्तिभिराहतं नो शान्तिं याति । यथोक्तम् –

शान्तिभिराहतं शममुपैति ।
नाभसमुपैति मृदुतां शाम्यति नो दिव्यमित्येके ।।[28]

प्रस्तुतप्रबन्धेऽस्मिन् संहितास्कन्धान्तर्गतानां आन्तरिक्षोत्पातानां शास्त्रीयपरम्परानुसारं विचारः निरूप्यते ।

**आन्तरिक्षोत्पाताः**

आन्तरिक्षोत्पाताः अष्टादशविधाः सन्ति । भूवोपरि आकाशे स्थिताः भूवः वायोः अन्तर्गताः अन्तरिक्षे उत्पन्नाः उल्का प्रति सूय 'परिवेषेन्द्रधनुरश्मिदण्डगन्धर्वनगरनिर्घातसन्ध्यादिग्दाहछाया तमोधूमरजोनीहारविद्युत्वात– मेघप्रवर्षणातिवृष्टिकबन्धश्च ।

**प्रतिसूर्यः**

प्रतिसूर्यो नाम द्वितीयः सूर्यः। परिधेस्तु प्रतिसूर्यः इति प्रतिसूर्यानुवृत्तौ। सूर्योदयादनन्तरं प्रहरमेकं यावत् तथा सूर्यास्ताद् पूर्वं प्रहरमेकं यावत् यदा स्वल्पमेघस्य दर्शनं भवति तदा कदाचित् सूर्यकिरणैः प्रकाशितमेघखण्डः द्वितीयसूर्यवत् दृश्यते। तत्र मेघे द्वितीयसूर्यस्याभासो भवति। आधुनिकानां मते वायुना निर्मितक्षुद्रकणिकाभिः दृष्टिभ्रमो भवति तदेव प्रतिसूर्यः। कदाचित् एकाधिकाः प्रतिसूर्याः अपि दृश्याः भवन्ति। अधुना प्रतिसूर्यः 'सनडॉग' 'फैंटगसन्' इति नाम्ना परिचितोऽस्ति । प्रतिसूर्यस्य दर्शनं उपद्रवकारकम्। विष्णुधर्मोत्तरपुराणे सूर्यमण्डलस्य दिशानुसारं फलानि निरूपितानि सन्ति । यदि सूर्यमण्डलस्योत्तरदिशि प्रतिसूर्यस्य दर्शनं भवेत्तदा जलकृत्, दक्षिणे वायुप्रकोपाय, उभयस्थितौ महावृष्टिः, उपरि राजमृत्यवे, अधस्तात्ज्जनविनाशाय सर्वतश्च भुवनपीडावहो भवति । अपि च बृहत्संहितायाम्–

दिवसकृतः प्रतिसूर्यो जलकृदुदग्दक्षिणे स्थितोऽनिलकृत् ।
उभयस्थः सलिलभयं नृपमुपरि निहन्त्यधो जनहा ।।[29]

पराशरमते रवेः पूर्वभागे प्रतिसूर्यदर्शनं युवराजस्य राज्ञोः च वधाय भवति ।अग्निकोणे अग्निप्रकोपः, दक्षिणे विग्रहः, नैऋत्ये चौरभयम् , पश्चिमे वृष्टिः, वायव्ये वायुस्तथा वृष्टिः, उत्तरे अतिवृष्टिः, ईशानेऽपि प्रतिसूर्यस्य दर्शनमतिवृष्टिकारको भवति । सायंकाले यदि दर्शनं भवेत्तर्हि पूर्वाद्यष्टदिशाषु क्रमेण सकलनृपतिविनाशं, कुमारवधं, मरकभयं, दस्युशस्य पीडामन्नक्षयं, व्याधिशस्त्रकोपयजमानयाजकभयं च भवति। पराशरमते सायंकाले सूर्यस्य समीपे प्रतिसूर्यमाला यदि दृश्यते तदा सूर्यवर्गयुक्तानां प्रचुरा वैराः, रोगाः, विविधाः घोरा उपद्रवाश्च भवन्ति। [30] बृहत्संहितायां प्रतिसूर्यस्य वर्णानुरोधेन फलविचारः प्राप्यते । पीतवर्णाकारः प्रतिसूर्यो व्याधिं उत्पादयति । अशोकपुष्पसदृशवर्णाकारः प्रतिसूर्यो शस्त्रकोपाय भवति । प्रतिसूर्याणां माला दृश्यते तर्हि दस्युभयातंकनृपवधेभ्यः भवन्ति। [31] मयूरचित्रानुसारं सूर्योदयकाले प्रतिसूर्यः यदि दृश्यते तदा मासार्धात् वर्षत्रयं यावत् भयं जनयति ।अस्य शमनार्थं साधारणशान्तिविधानं कर्त्तव्या।

**परिवेषः**

परितो विष्यते व्याप्यतेऽनेन इति परिवेषः अर्थात् परिधिः मण्डलश्च । संहिताग्रन्थेषु सूर्यचन्द्रयोः परिवेषवशादनेकानि शुभाशुभफलानि निरूपितानि सन्ति। रविचन्द्रयोः किरणाः वायुना मण्डलीभूता स्वल्पमेघे आकाशे प्रतिफलिताः नानावर्णाकृतयो दृश्यन्ते ते परिवेषा इत्युच्यन्ते । यथोक्तम् –

सम्मूर्च्छिना रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः ।
नानावर्णाकृतयस्तत्त्वभ्रे व्योम्नि परिवेषाः ।।[32]

पराशरेणापि परिवेषस्य स्वरूपं प्रतिपाद्य कथयन्ति यत् वायुमेघसूर्यचन्द्रयोर्किरणानां संयोगजन्यविकारैः सूर्यचन्द्रबिम्बयोः परितः मण्डलाकारपरिवेषः उत्पद्यते । तद्यथा –

अथ परिवेषा वाताभ्ररश्मिविकारसमुत्थाननं चन्द्रे सूर्ये वा ।[33]

भार्गवाचार्यमतेन वायुना भूवः रजः सूक्ष्मवर्णपांशुं गृहीत्वा लोकानां हिताहितसूचनार्थं नक्षत्रग्रहताराणां किरणैः सम्मूर्च्छिता आकाशे परिवेषरुत्पद्यते । पुराणमहाभारतादिषु परिवेषदर्शनस्याशुभफलानि निर्दिष्टानि सन्ति । हरिवंशमत्स्यपुराणपद्मपुराणेषु हिरण्यकश्यपस्य वधनिमित्तकाले मध्याह्नकालिकसूर्यस्य परिवेषदर्शनं उल्लिखितमस्ति । महाभारतस्य मुशलपर्वे यदुवंशियानां क्षयनिमित्तं चन्द्रसूर्ययोः दारूणाः परिवेषाः दृश्या आसन्। तद्यथा –

परिवेषाश्च दृश्यन्ते दारूणाश्चन्द्रसूर्ययोः ।
त्रिवर्णाः श्यामरूक्षान्तास्तथा भस्मारूणप्रभा ।।

महाभारतस्य भीष्मपर्वणि कुरूपाण्डवसैन्यक्षयनिमित्तमशुभपरिवेषलक्षणमुक्तं वर्तते । तद्यथा –

परिवेषस्तथा घोरः चन्द्रभास्करयोरभूत् ।
वेदयानो भयं घोरः राज्ञां देहावकर्तनम् ।।

अरण्यकाण्डेऽपि खरवधनिमित्तं उक्तं वर्तते यत् खरवधकाले कृष्णस्तथा रक्तवर्णाकारा परिवेषाः सूर्यस्य परितः दृश्याः आसन् । उक्तं यथा –

श्यामं च रक्तपर्यन्तं बभूव परिवेषणम् ।
अवातचक्रप्रमितं परिगृह्यं दिवाकरम् ।। म.भा.अ.का.

गर्गाचार्यमते द्विमण्डलयुक्तः परिवेषः सेनापतिवधकरः, त्रिभिर्मण्डलैर्युक्तः परिवेषः दारूणयुद्धं कुर्यादिति । एकस्मिन् अहोरात्रे दिवा सूर्यस्य रात्रौ चन्द्रस्य च परिवेषः दृश्यते तदा भूपस्य मृत्युर्भवति । सूर्यस्योदयास्तमध्याह्नकालेषु परिवेषदर्शनं राष्ट्रनाशकरं भवति । यस्मिन् देशे सूर्यं विहाय कोऽपि ग्रहः एकेन नक्षत्रेण, चन्द्रेण च साकं एकस्मिन् परिवेषे गताः स्युः तदा तस्मिन् देशे दिनत्रयं यावत् वृष्टिर्भवति अथवा एकमासान्तरेण विग्रहं भवति।[34] अपि च वराहसंहितायाम्–

वृष्टिस्त्र्यहेण मासेन विग्रहो वा ग्रहेन्दुभनिरोधे ।
होराजन्माधिपयोजन्मर्क्षे वाऽशुभो राज्ञः ।।

वराहमते यस्य राज्ञः जन्माधिपादयः (जन्माधिपलग्नाधिपजन्मनक्षत्राणि) परिवेषावरूद्धास्तस्य राज्ञः पराजयोऽन्यस्य जय च।[35] वराहेण रविचन्द्रपरिवेषाभ्यन्तरस्थग्रहवशादपि फलं प्रतिपाद्यते । सूर्यचन्द्रयोः परिवेषमध्यगतयोः द्वयोःताराग्रहयोः स्थितिः युद्धं करोति । त्रिषु ग्रहेषु दुर्भिक्षमवृष्टिश्च, चतुर्षु ताराग्रहेषु राजासमात्यपुरोहितैः सहितो मृत्योर्वशं याति । पंचादिषु ताराग्रहेषु परिवेषमध्यवर्तिषु विश्वस्य प्रलयं याति ।[36] इदृशः विचारः भार्गवीयसंहितायामपि प्राप्यते।[37] यदि

केतोरूदयो न भवति तस्मिन्नेवकाले पृथक् पृथक्ताराग्रहाणां अथवा अश्विन्यादीनां नक्षत्राणां परिवेषः उत्पन्नः राज्ञो मरणं कुर्यादिति वराहेण उक्तं स्वसंहितायाम् ।[38] परिवेषगतानां सूर्यादिग्रहाणां फलमपि तत्र वर्णितमस्ति । परिवेषमण्डलगतो शनिः क्षुद्रधान्यनाशकरः, वातवृष्टिमुत्पादयति, परिवेषमध्यगते भौमे कुमाराणां चमूनाथानां च आकुलता, अग्निभयं, शस्त्रभयं च भवति । परिवेषमध्यगते जीवे पुरोहिताचार्यामात्यानां पीडा भवति । शुक्रे यायीनां, क्षत्रियाणां, नृपमहिष्याणां पीडा दुभिक्षं च भवति । केतौ दुर्भिक्षम्, अग्निभयं, शस्त्रभयं, राजभयं च भवति।[39] प्रतिपदादिषु चतुर्षु तिथिषु परिवेषः दृश्यते तर्हि क्रमेण विप्रक्षत्रियवैश्यशूद्रान् हन्ति । चतुर्दश्यामभ्युत्थितः परिवेषः राज्ञः पत्न्याः पीडां करोति । यथोक्तम् –

पंचदश्यां मनुजाधिपस्य पीडां करोति ।
विप्रक्षत्रियविट्शूद्रहा भवेत् प्रतिपदादिषु क्रमशः ।।
नरपतिपत्नी पीडां परिवेषोऽभ्युत्थितश्चतुर्दश्याम् ।
कुर्यात्तु पंचदश्यां पीडां मनुजाधिपस्यैव ।।[40]

मत्स्यपुराणानुसारं परिवेषोत्पातानां शान्त्यर्थं वृष्टिविकारविहिताः शान्तिः कर्त्तव्या इति । सप्ताहात् परिवेषफलपाक इति वराहेणोक्तम् । गर्गमते ग्रहाणां परिवेषेषु त्रिरात्रात् फलमादिशेत् इत्युल्लिखितमस्ति। [41] भद्रबाहुसंहितायां किंचित् भिन्नमतं दृश्यते । तेषां मतेन परिवेषाः पंचवर्णाकाराः, पंचभौतिकाश्च भवन्ति । यथोक्तम्

पंचप्रकारा विज्ञेयाः पंचवर्णाश्च भौतिकाः ।
ग्रहनक्षत्रयोः कालं परिवेषाः समुत्थिताः ।।[42]

रूप्यपारापताभश्च परिवेषः पृथ्वीं जलेन पूर्णं करोति । पूर्वादि दिक्षु इन्द्रधनुषवर्णसदृशः परिवेषः संग्रामं करोति। सन्ध्याकालिकाभ्युन्नतश्चन्द्रः यदि श्वेतरूक्षवर्णयुक्तपरिवेषेन युक्तो भवति तर्हि राष्ट्रं धौरैर्विलुप्यते । यदि अनेन वर्णयुक्तः परिवेषः सूर्यमण्डलं अवरूद्धति तर्हि गवां मरणमादिशेत् । सूर्यस्य चन्द्रस्य वा समन्ताद् मुहुर्मुहुः परिवेषस्य दर्शनं दारूणं संग्रामं करोति । यदि सूर्यस्य परिवेषः सूर्योदयादस्तपर्यन्तं दृश्यते तर्हि क्षुद्भयं, महामारी, मरणं, युद्धं च भवति ।[43]

**निर्घातः**

निर् + हन् + घञ् = निर्घातः

अर्थात् वाय्वभिहतवायुप्रपतनजन्यशब्दविशेषः ।

वायुनाभिहते वायौ गगनाच्च पतत्यधः ।
प्रचण्डघोरनिर्घोषो निर्घात इति कथ्यते ।।

गर्गेणाऽपि उक्तम् –[44]

यदान्तरिक्षे बलवान् मारूतो मारूताहतः ।
पतत्यधः स निर्घात भवेदनिलसम्भवः ।।

तथा च वराहेण –[45]

पवनः पवनाभिहतो गगनादवनौ यदा समापतति ।
भवति तदा निर्घातः स च पापो दीप्तविहगरूतः ।।

अर्थात् पवनो पवनेनाभिहतः स पवनः गगनात् भूमौ यदा समापतति तदा तस्याभिहतस्य पवनस्य यः शब्दः स निर्घातो भवति । स च निर्घातः दिक्कालतिथिनक्षत्रानुरोधेन चतुर्विधं भवति । तत् भेदवशात् फलं अपि प्रयच्छन्ति । यथोक्तं पराशरेण – " निर्घातेषु दिक्कालतिथिनक्षत्रानुबन्धेन चतुर्विधं फलमुपदिशन्ति यावच्छब्दे देशे " यस्मिन् देशे निर्घातशब्दं श्रूयते तस्मिन्नेवदेशे तस्य फलं घटति । तद् वद् यस्मिन् दिशि निर्घातशब्दं श्रूयते तस्मिन् दिशि पतति । पूर्वादिषु अष्टदिक्षु निर्घातशब्दफलं क्रमेण राजमरणं, रोगः, मरकं, क्षयः, अतिवातः, पुरोहितवधं, व्याधिः, अग्निभयं च पराशरेण उक्तम् । गर्गमते यस्मिन् दिशि भयंकरशब्दयुक्तः निर्घातोत्पद्यते तस्मिन् दिशि स्थितदेशस्य नाशं करोति । वराहमतेन भैरवजर्जरशब्दयुक्तः निर्घातः स्वदिशं हन्ति । विष्णुधर्मोत्तरपुराणेऽपि भयंकरशब्दयुक्तनिर्घातः स्वदिशु राजानं हत्ति । तिथ्यानुरोधेन पराशरेण उक्तं यत् प्रतिपदष्टमीचतुर्दशीषु तिथिषु उत्पन्नाः निर्घाताः मन्दफलानि अन्याषु तिथिषु अशुभफलं प्रयच्छन्ति ।[46] बार्हस्पत्ये मेघरहिताकाशे निर्घातः पतति तर्हि राज्ञो मृत्युर्भवति । यस्मिन्नक्षत्रे मेघरहिताकाशे निर्घातः पतति तस्मिन् नक्षत्रे वृष्टिर्भवति । यथोक्तं पराशरेण –" यत्र नक्षत्रे वर्षणं प्रदुष्यात् तस्मिन् वर्षणं विन्द्यात् [47]।''
सूर्योदयकाले यदि निर्घातोत्पद्यते तदा अधिकारिणः, राजा, धनिनः, योधा, स्त्रियः, वणिजः, वेश्या च नश्यति। दिवसस्य प्रथमप्रहरे निर्घातो भवति तर्हि छागाविकशूद्रपुरवासीनां नाशो भवति। द्वितीयप्रहरे राजसेवकब्राह्मणानां कृते पीडा । तृतीयप्रहरे वैश्यानां मेघानां च नाशो भवति। अस्तं यातेऽर्के यदि निर्घातोत्पद्यते तदा नीचानधर्मकर्मकरान्निहन्ति । रात्रेः प्रथमप्रहरे सस्यानि नाशयति। रात्रेर्द्वितीयप्रहरे पिशाचसमूहान् निपीडयति । रात्रेस्तृतीयप्रहरे तुरगान् , करिणः निहन्यात् । चतुर्थे प्रहरे जिगमिषून् निहन्यात् । यथोक्तं बृहत्संहितायाम् –[48]

अर्कोदयेऽधिकरणिकनृपधनियोधांगनावणिग्वेश्याः ।
आप्रहरांशेऽजाविकमुपहन्याच्छूद्रपौरांश्च ।।
आमध्याह्नाद्राजोपसेविनो ब्राह्मणांश्च पीडयति ।
वैश्यजलदांस्तृतीये चौरान् प्रहरे चतुर्थे तु ।।
अस्तं याते नीचान् प्रथमे यामे निहन्ति सस्यानि ।
रात्रौ द्वितीययामे पिशाचसंघान् निपीडयति ।।
तुरगकरिणस्तृतीये विनिहन्याद्यायिनश्चतुर्थे च ।
भैरवजर्जरशब्दो याति यतस्तां दिशं हन्ति ।।

**सन्ध्या**

अहोरात्रस्य यः सन्धिकालः सा सन्ध्या । सा तु द्विनाड्यात्मिका इति गर्गः सन्ध्यालक्षणं उक्तम् । यथा–

अहोरात्रस्य यः सन्धिः सा च सन्ध्या प्रकीर्तिता ।
द्विनाडिका भवेत् साधुर्यावदाज्योतिदर्शनम् ।।

सा च द्विधा सायं सन्ध्या प्रातः सन्ध्या च। अर्द्धास्तसूर्यबिम्बात् यावत् कालपर्यन्तमाकाशमस्पष्टभं तावदेका सायं सन्ध्या एवं प्रातः काले यदा भानां स्वल्पा कान्तिर्भवति ततः कालाद्यावत्सूर्यबिम्बस्यार्धोदितं यावत् द्वितीया प्रातः सन्ध्या इति वराहेणापि उक्तं यथा [49]–

अर्द्धास्तमितानुदितात् सूर्यादस्पष्टभं नभो यावत् ।
तावत् सन्ध्याकालश्चिह्नैरेतैः फलं चास्मिन् ।।

संहितापुराणादिषु ग्रन्थेषु सन्ध्याकालिकलक्षणैरुत्पातफलानि निरूक्तानि सन्ति। महाभारतस्य भीष्मपर्वणि कुरूपाण्डवसैन्यक्षयनिमित्तमुल्लिखितं वर्तते यत् उभे सन्ध्ये दिग्दाहसमन्विते प्रकाशेते। तद्यथा –

उभे सन्ध्ये प्रकाशेते दिशो दाहसमन्विते ।[50]

हरिवंशपुराणेऽपि अर्जुनपराजयनिमित्तं कंशवधनिमित्तं चोत्पातयुक्तसन्ध्यायाः लक्षणं प्रतिपादितमस्ति। तद्यथा –

सन्ध्यारागो जपावर्णः ।
प्राक्सन्ध्या परिघग्रस्ता भाभिर्बाधति भास्करम् ।।

बार्हस्पत्ये प्रदिप्तलक्षणयुक्तसन्ध्यायाः वर्णनं प्राप्यते। तमोधूमरजस्काभ्रदीप्तद्विजमृगावृताः सन्ध्याः अहितावहाः विग्रहोद्घातिन्यः सन्ति ।[51] वस्तुतः निर्मला, प्रशान्तशकुना मृदुमारूता, सूर्यकिरणसमावर्णा च सन्ध्या वर्षाकाले शुभं करोति। विपरीतलक्षणैर्युक्ता सन्ध्या सर्वदा उत्पातदा भवति। वराहसंहितायामेव उल्लिखितमस्ति यत् रजध्वस्ता, रूक्षा, रूधिरनिभा च सन्ध्या जनपदनाशं करोति । सन्ध्याकाले गृहतरुतोरणकम्पितः, सपांशुलोष्टः, भैरवरावयुक्तः, रूक्षः, खगपातिनश्च वायुः अशुभफलं प्रयच्छति । सन्ध्याकालः यदि सूर्यसन्मुखस्थितविहंगश्रृगालमृगानां शब्दैर्युक्तः, दण्डधूलिपरिघैः युक्तः अथवा विकारयुक्तसूर्येण युक्तः स्यात्तर्हि राष्ट्रनरेशसुभिक्षान् नाशयति। वर्षाकाले दण्डपरिघाद्यशुभाकृतियुक्तमेघाः, गन्धर्वनगरं, हिमधूमरजयुक्ताः सन्ध्या अवृष्टिं करोति। अन्येषु ऋतुषु शस्त्रकोपभयदा भवति। सर्वदा सूर्याभिमुखाःअर्थात् दीप्ताः मृगाणां पक्षीणां च शब्दाः प्रातः सन्ध्याकाले देशनाशकराः भवन्ति। सूर्याभिमुखाः दक्षिणदिग्गताः मृगपक्षीणां इदृशाः शब्दाः यस्मिन् नगरे दृश्यते तं नगरं शत्रुभिः आक्रान्तं भवति। बृहत्संहितायां सन्ध्याकालिनपरिघवशेन शुभाशुभलक्षणानि निरूपितानि सन्ति। सूर्यस्योभयपार्श्वगतौ सूर्यस्य परिधी अतिवृष्टिं कुरूतः। यदि परिधयः सकलदिग्व्यापिनो भवन्ति तर्हि जलस्य कणोऽपि न वर्षति। यथोक्तं बृहत्संहितायाम् [52]–

> गृहतरुतोरणमथने सपांशुलोष्टोत्करेऽनिले प्रबले ।
> भैरवरावे रूक्षे खगपातिनि चाशुभा सन्ध्या ।।
> दीप्तविहंगशिवामृगघुष्टा दण्डरजः परिघादियुता च ।
> प्रत्यहमर्कविकारयुता वा देशनरेशसुभिक्षबधाय ।।
> अशुभाकृतिघनगन्धर्वनगरनीहारधूमपांशुयुता ।
> प्रावृषि करोत्यवग्रहमन्यर्तौ शस्त्रकोपकरी ।।
> दीप्तमृगाण्डजविरुता प्राक् सन्ध्या देशनाशमाख्याति ।
> दक्षिणदिक्स्थैर्विरुता ग्रहणाय पुरस्य दीप्तास्यैः ।।
> उभयपार्श्वगतौ परिधी रवेः प्रचुरतोयकरौ वपुषान्वितौ ।
> अथ स मस्तककुप्यरिचारिणः परिधयोऽस्ति कणोऽपि न वारिणः ।।

सन्ध्यायाः वर्णानुरोधेनापि शुभाशुभफलनिर्धारणं भवति। सन्ध्यायाः कान्तिः यदि गोमूत्राभासदृशं, घृतभाण्डाभासदृशं, निर्मला, हिंगुलसन्निभा, लाक्षा, विद्रुमकान्तियुक्ता च सन्ध्या वृष्ट्यैः रणाय च भवति। प्रभाहीना, रूक्षा, भस्मनिभा, रजोयुक्ता च सन्ध्या राष्ट्रनृपान्तकृत भवति। यथोक्तं मयूरचित्रे –

> गोमूत्राभाऽऽज्यभाण्डाभा स्निग्धा हिंगुलसन्निभा ।
> लाक्षा विद्रुमकान्तिश्च सन्ध्या वृष्ट्यै रणाय च ।।
> तमोयुक्ता रजोयुक्ता सन्ध्या राष्ट्रनृपान्तकृत् ।

रूक्षखण्डितसूक्ष्माल्पधूमाभारक्तविवर्णाः सन्ध्याकालिकरविकिरणाः अशुभफलप्रदाः भवन्ति। बन्धूकपुष्पवर्णाः, सुवर्णकान्तियुक्ताः, रजसा संवृतः उदयकालिकसूर्यश्च शस्त्रभयं परन्तु वराहसंहितानुसारं शतरोगभयं भवति।

**छाया**

दिवा मेघविहिनाकाशगते सूर्ये मर्त्ये भूतानां, दृश्यमानवस्तूनां वा छाया नाऽवलम्बते अथवा विपरीता छाया प्रतियते तदा पृथिव्यामुपद्रवाः जायन्ते। यथोक्तं मत्स्यपुराणे –

> विरजस्के रवौ व्यभ्रे यदा छाया न दृश्यते ।
> दृश्यते तु प्रतीपा वा तदा देशभयं भवेत् ।।

मत्स्यपुराणे हिरण्यकशिपुवधकालिकलक्षणम् –

> यदा च सर्वभूतानां छाया न परिवर्तते ।
> अपराह्नगते सूर्ये लोकानां युगसंक्षये ।।

दिवा व्यभ्रे विरजसि वा रवौ छायाऽदर्शनं तत्प्रतिलोम्यदर्शनं वा जनमारभयमिति पराशरेण उक्तम्। मयूरचित्रानुसारं इदृश्यां स्थित्यां प्राजापत्यशान्तिविधानं करणीयम् ।

**कबन्धः**

कबन्धश्छिन्नशिरसः । क्रियायुक्तापमूर्द्धकलेवरम् । सन्ध्याकाले कबन्धं यदि दृश्यते तर्हि पंचविंशतिरात्रिं यावदुभयं तथा महापुरुषविद्रवं भवति । यथोक्तं भद्रबाहुसंहितायाम् [53]

> पंचविंशतिरात्रेण कबन्धं यदि दृश्यते ।
> सन्ध्यायां भयमाख्याति महापुरूषविद्रवम् ।।

महाभारतस्य गदापर्वणि पाण्डवशिविरवधकाले बहुपादैः बहुभुजैः युक्तैः कबन्धैः दिशः व्याप्तः आसीत् । यथोक्तम्–

> बहुपादैर्बुहुभुजैः कबन्धैर्घोरदर्शनैः ।
> नृत्यद्भिर्भयदैव्याप्ता दिशस्तत्राभवन्नृपः ।।

कबन्धदर्शनादनन्तरं सावित्रीमन्त्रेण दशलक्षहोमादिका अभयाख्या शान्तिरथवा महाशान्तिः कर्तव्या।

**विद्युत्**

विशेषेण द्योतते इति तच्छीला वा परस्परविपरीतदिग्गतयोः वायुमेघखण्डयोः घर्षणेन विद्युत् उत्पद्यते । सा च फलाधारेण द्विधा। प्रशस्ता अप्रशस्ता च । मयूरचित्रानुसारं दक्षिणदिग्गता विद्युत् शस्त्रप्रकोपभयं च उत्पादयति । यदि सर्वासु दिक्षु विद्युतः दृश्यन्ते तर्हि सप्तरात्रं महावर्षं, घोरभयं च उत्पादयति । पराशरमतेन तु सर्वासु दिक्षु प्रदक्षिणमभिवृत्यः विद्युत् उत्पद्यते तर्हि सुमहावृष्टिः भवति । विपरीतक्रमेणोत्पन्नः विद्युत् विपरीतफलं अर्थात् अवृष्टिं करोति । नक्षत्रवीथ्यानुसारं दक्षिणमार्गोत्पन्नाः विद्युतः सर्वदा अवृष्टिकारीकाः सन्ति। अस्निग्धकपिलमेघेषु उत्पन्नाः विद्युतः शस्त्रकोपभयं ददाति [54]। भद्रबाहुसंहितानुसारं सूर्यमण्डलाद् निष्क्रम्य रक्तवर्णा समलिना विद्युत् यदि चन्द्रमण्डलं प्रविश्यति तर्हि भयंकरवृष्टिर्भवति । तद्यथा–

> अथ सूर्याद् विनिष्क्रम्य रक्ता समलिना भवेत् ।
> प्रविश्य सोमं वा तस्य तत्र वृष्टिर्भयंकरा ।।[55]

भार्गवीयानुसारमाषाढशुक्लपक्षचतुर्थ्यां पंचम्यां च विद्युत्स्फुरवाताभ्यां वार्षिकं वृष्टिज्ञानं, धान्यानां निष्पत्तिश्च निश्चियते । तेषां मते अग्निकोणगता विद्युत् अवृष्टिं, शस्त्रभयं, अग्निभयं च करोति । दक्षिणदिग्गता विद्युत् व्याधिं, मृत्युभयं च करोति । नैर्ऋत्यकोणगता विद्युत् ईतिभयं ददाति । पश्चिमदिग्गता विद्युत् मध्यमशस्यं, व्याधिभयं च ददाति । यस्यां दिशि विद्युत् दृश्यते तद् विरूद्धदिशि यदि वायुवहति तर्हि ईतिबाहुल्यं भवति । सर्वासु दिक्षु विषमां वृष्टिं च करोति ।[56] मयूरचित्रानुसारं विद्युत् उत्पातार्थं सामान्यशान्तिः कर्त्तव्यः। कबन्धशान्तिविधानवत् अत्रापि सावित्रीमन्त्रेण दशलक्षहोमादिका अभयाख्या शान्तिरथवा महाशान्तिः कर्त्तव्याः।

**गन्धर्वनगरम्**

आकाशे दृश्यमानं काल्पनिकनगरं खपुरं गन्धर्वनगरं वा । अर्थात् आकाशे उत्थितशुभाशुभादिसूचनार्थं प्रकाशितम् । पुरं खपुरम् । स तु दैत्यपुरविशेषः । तदुत्पत्तिकथा महाभारते (3/173) प्राप्यते । कादम्बिनीग्रन्थमते एतत् मेघानां षड्विधेषु विकारेषु एकः विकारः भूम्यां स्थितवास्तविकनगराणां प्रतिकृतिरेव गन्धर्वनगरम् । नगराणां प्रतिबिम्बानि वायुमण्डलस्य विभिन्नं स्तरं भित्वा गच्छन्ति । तेन मेघे तेषां छाया वास्तविकनगरवत् प्रतिभाति । भद्रबाहुसंहितायां खपुरस्य वर्णानुरोधेन अशुभफलानि निरूपितानि सन्ति । पूर्वस्यां दिशि दृष्टं रक्तं खपुरं शस्त्रोत्पातं, पीतं खपुरं मृत्युतुल्यकष्टदायकव्याधिं, पश्चिमस्यां कृष्णवर्णाकृतिखपुरं वधभयं च ददाति [57]। वराहमिहिरमते

उत्तरादिसु दिक्षु दृष्टं खपुरं क्रमेण पुरोहितनृपबलपतियुवराजदोषदं भवति । तं सितरक्तपीतकृष्णं वर्णाकारं विप्रादीनां नाशाय भवति। यथोक्तम् [58]–

> उदगादिपुरोहितनृपबलपतियुवराजदोषदं खपुरम् ।
> सितरक्तपीतकृष्णं विप्रादीनामभावाय ।।

परन्तु पराशरेण भिन्नमतमुपस्थापितम् । पूर्वाद्यष्टासु दिक्षु खपुरं दर्शनं क्रमेण क्षुत्पीडा, अग्निप्रकोपः, युवराजवधं, तस्करोपद्रवं, राजपीडां, तपस्वीनां भयं, भूतागमनं, वर्षं च भवति [59]। यदा गन्धर्वनगरमनेकवर्णाकृतिर्युक्तं, पताकाध्वजतोरणान्वितं दृश्यते तदा गजानां, मनुष्याणां, वाजीनां, च रूधिरं संग्रामे भूः पिबति [60]। काश्यपमते बहुवर्णपताकाढ्ये गन्धर्वनगरे लोमहर्षणे संग्रामे महत् प्रजाक्षयकरं भवति ।

**पराशरमते खपुरदर्शनफलम्**

दीप्तायां दिशि विच्छिन्नरूपं वृक्षाग्रेषु दृश्यते महाभयम् । ऐशान्ये दिशि अभियोक्तृवधाय । वारूण्यामभियुक्तस्य । एभ्यस्त्वन्यानि दिशान्ते स्निग्धरूपाण्यविच्छिन्नानि शुभानि विन्द्यात् [61]। सततं दृश्यमानं खपुरं राष्ट्रभयावहम् इति सर्वेषां संहिताकाराणां मतम् । अस्यापि शान्तिविधानं विद्युतशान्तिवत् करणीयम् ।

**इन्द्रचापः**

मेघयुताकाशे सूर्यरश्मयः वायुना रूद्धाः विविधवर्णरूपाः चापाकारा ये दृश्यन्ते तदिन्द्रधनुरित्युच्यते । वस्तुतः सप्तवर्णयुक्ताः सूर्यकिरणाः वृष्टेः जलबिन्दुमध्ये प्रविश्य सप्तवर्णाकाराचापमुत्पादयन्ति । केचिदाचार्याः वदन्ति यत् अनन्तनागराजस्य कुले जातानामुरगानां निःश्वासैः इन्द्रधनोः उत्पत्तिर्जायते । यथोक्तम् [62]–

> सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे ।
> वियति धनुः संस्थाना ये दृश्यन्ते तदिन्द्रधनुः ।।

अपि च –

> केचिदनन्तकुलोरगनिः श्वासोद्भूतमाहुराचार्याः ।

संहिताग्रन्थेषु इन्द्रचापदर्शनस्य स्थानवशात् कालवशात् वर्णवशात् च शुभाशुभफलानि प्रतिपादितानि सन्ति । बृहत्संहितामते इन्द्रचापं जलमध्ये यदा दृश्यते तदा अनावृष्टिं करोति । भूमौ दृश्यते तदा सस्यानां नाशं करोति । वृक्षे अस्य दर्शनं व्याधिं जनयति । वल्मीके शस्त्रभयं च करोति । तद्यथा [63]–

> जलमध्ये अनावृष्टिर्भुवि सस्यवधस्तरौ स्थिते व्याधिः ।
> वाल्मीके शस्त्रभयं निशि सचिववधाय धनुरैन्द्रम्।।

इन्द्रधनोः दर्शनं मेघयुक्ताकाशे सूर्यकिरणैः भवति । यदि दैवात् रात्रौ मेघरहिताकाशे अस्य दर्शनं महाभयाय, मरकभयाय च भवतीति विष्णुधर्मोत्तरपुराणेऽपि प्राप्यते । तद्यथा [64]

> रात्राविन्द्रधनुश्चेद्वयभ्रे महाभयाय च।

मेघरहिताकाशस्य पूर्वभागे पश्चिमे वा अस्य दर्शनं दुर्भिक्षभयं ददाति। रात्रौ अस्य दर्शनं नृपतेर्वधाय परचक्रागमनाय भवतीति मयूरचित्रके उल्लिखितमस्ति। विदिशायां इन्द्रचापस्य दर्शनं तद् दिग्स्वामिनाशाय भवति। ईशानकोणे श्वेतवर्णाकारः इन्द्रचापः दुर्भिक्षं करोति। इन्द्रचापः यदा सूर्यबिम्बं आच्छादयति तदा नृपतीनां मध्ये विरोधं उत्पादयति। वर्षाकालं विहाय अन्येषु ऋतुषु स्निग्धः इन्द्रचापः यदि समुद्रे द्विनगे वा दृश्यते तदा भयमुत्पादयति। युद्धकाले वक्रः इन्द्रचापः यदि दृश्यते तदा उभयपक्षयोः सैन्यानां मृत्युर्भवति। रक्तवर्णाकारः, मांजिष्ठवर्णाकारः, श्यामवर्णाकारः, अरुणवर्णाकारः,नीलवर्णाकारः, पीतवर्णाकारश्च इन्द्रचापः भयं ददाति । रूक्षः राजमृत्युप्रदो भवति। वस्तुतः रात्रौ इन्द्रधनोः दर्शनं उत्पातकारको भवति । इन्द्रधनुषः फलं सद्यः सप्तरात्राभ्यन्तरेण भवति ।

**वातः**

वातीति वातः । पंचभूतान्तर्गतचतुर्थभूतः वातसंज्ञकः । सः कदाचित् उत्पातं जनयति । 78 % नाइट्रोजन + 21% ऑक्सीजन + 0.9% आर्गन + 0.1% अन्यानां सम्मिश्रणेन वातस्योत्पत्तिर्भवति । पृथिव्याः भौगोलिकीस्थितिः पर्वत–भूवः अक्षभ्रमणेन च वातचलने परिवर्तनं दृश्यते। प्रवह–आवह–उद्वह–संवह–विवह–परिवह–परावहेति इत्यनेन सप्तप्रकारकाः वाताः भवन्ति। ते वाताः सशर्कराः, रूक्षाः, प्रतिलोमगताः, सर्वविघ्नसमन्विताः भयकृत् भवन्ति । यस्मिन् वर्षे आषाढपौर्णमास्यां वायुः आग्नेय्यां दिशि वहति तस्मिन् वर्षे पृथिव्यां वृष्टेरभावो, अग्निभयं, प्रजानाशादि उपद्रवाः भवन्ति । यस्मिन् वर्षे आषाढपौर्णमास्यां सूर्यास्तकाले नैऋत्यदिशि वायुः सूक्ष्मैलालवलीलवंगनिचयान् व्याघूर्णयन् प्लवति तस्मिन् वर्षे मरकत्वात् पृथ्वी प्रेतवधूरिव लक्ष्यते।[65] पराशरमते सर्वासु दिक्षु अतिमात्रेषु अनवरतेषु सप्तरजं यावत् भयं, महावर्षं वा भवेत् । द्वादशरात्रिषु महावर्षं राजमृत्युं वा भवेत् । पक्षेषु भयमेव च । तत्र पूर्वदिग्गतः वायुः क्षुद्भयं, आग्नेयगतः क्षुद्भयं, शस्त्रभयं, दस्युभयं च ददाति । दक्षिणदिग्गतः फलमूलपुष्पानां नाशं, उत्पातातंकपिटकानां भयं च उत्पादयति । नैऋत्यकोणयुक्तवायुः कृमिपतंगदंशमशकेभ्यः क्लेशं, शस्त्रभयं, ईतिं च उत्पादयति । वायव्यदिग्गतः वायुः क्षुद्भयं, शस्त्रभयं, देशनाशं च करोति । युगपत् सर्वदिग्गतवायुः महाराजभयं जनयति [66]। वार्हस्पत्ये वायुजनितोत्पातानां शान्त्यर्थं वायुदेवस्य पूजा शक्तुभिरर्चयेत् तथा च द्वाविमौ वाता इत्यस्य जपादि करणीयमिति उल्लेखं वर्त्तते । मयूरचित्रे साधारणशान्तिविधानं करणीयमिति ।

एतेषां अन्तरीक्षोत्पातानां प्रभावकालविषये प्रभावस्थानविषये च संहिताग्रन्थेषु उल्लिखितोऽस्ति । बृहत्संहितायाः सन्ध्यालक्षणाध्यायान्ते आन्तरीक्षोत्पातैः प्रभावितस्थानानां योजनात्मकं प्रमाणं निरूपितमस्ति। प्रतिसूर्यस्य परिधिस्त्रियोजनात्मकः अर्थात् यस्मिन् स्थानेऽस्य दर्शनं भवति तस्मात् योजनत्रयं यावत् स्वकीयं शुभाशुभफलं प्रयच्छति । परिघस्य पंचयोजनेषु एककालावच्छेदेन दृश्यते । तावत्स्वेव फलं ददाति । परिवेशचक्रं षट्पंचयोजनं दृश्यम् । तावन्मात्रेव फलदम् । इन्द्रधनुः दशयोजनं दृश्यते । तावत्स्वेव फलदं च । यथेक्तम् [67]

> प्रत्यर्कसंज्ञः परिधिस्तु तस्य त्रियोजनाभः परिघस्य पंच ।
> षट्पंचदृश्यं परिवेषचक्रं दशामरेशस्य धनुर्विभाति ।।

तद्वत् सन्ध्या स्वदीप्त्या एकं योजनं प्रकाशयति । सा च तावन्मात्रयोजनमेव फलदा भवति । विद्युद् षड्योजनानि प्रकाशयति तावन्मात्र सा फलदा । मेघानां गर्जितं शब्दः पंचयोजनानि गच्छति । योजनपंचमे फलदश्च । परन्तु उल्का सर्वत्र फलदा भवति । यथोक्तम् [68]

> एकं दीप्त्या योजनं भाति सन्ध्या विद्युद्भासा षट् प्रकाशी करोति ।
> पंचाब्दानां गर्जितं याति शब्दो नास्तीयत्ता केचिदुल्का निपाते ।। इति ।।

**संदर्भ सूची**


1. अद्भुतसागरः, सूर्याद्भुतावर्त्तः प्रकृत्यादिविवेकः–1
2. मैत्रायण्युपनिषद् 5/2
3. महाभारतशान्तिपर्वः, 306/27
4. श्रीमद्गीता, अध्या.02/25–28,
5. भद्रबाहुसंहिता, अध्या.02. श्लो.03,
6. शब्दकल्पद्रुमः
7. बृहत्संहिता, उत्पाताध्यायः, श्लो.01

8. भद्रबाहुसंहिता, अध्या.02. श्लो.05,
9. अद्भुतसागरः, उपोद्घातः
10. अद्भुतसागरः, उपोद्घातः
11. अद्भुतसागरः, उपोद्घातः
12. अद्भुतसागरः, उपोद्घातः
13. अद्भुतसागरः, उपोद्घातः
14. बृहत्संहिता, उत्पाताध्यायः, श्लो.03,
**15.** बृहत्संहिता, उत्पाताध्यायः, श्लो.
16. बृहत्संहिता, उत्पाताध्यायः, श्लो.
17. बृहत्संहिता, उत्पाताध्यायः, श्लो.
18. अद्भुतसागरः, उपोद्घातः
19. बृहत्संहिता, उत्पाताध्यायः, श्लो.05
20. अद्भुतसागरः, उपोद्घातः
21. अद्भुतसागरः, उपोद्घातः
22. अद्भुतसागरः, उपोद्घातः
23. बृहत्संहिता, उत्पाताध्यायः, श्लो.04
24. अद्भुतसागरः, उपोद्घातः
25. अद्भुतसागरः, उपोद्घातः
26. बृहत्संहिता, उत्पाताध्यायः, श्लो.07
27. बृहत्संहिता, उत्पाताध्यायः, श्लो.0
28. बृहत्संहिता, उत्पाताध्यायः, श्लो.05
29. बृहत्संहिता, प्र.सू.ल.अ., श्लो.03
30. अद्भुतसागरः, प्रतिसूर्याद्भुतावर्त्तः
31. बृहत्संहिता, प्र.सू.ल.अ., श्लो.02
32. बृहत्संहिता, प्र.सू.ल.अ.34 श्लो.01
33. अद्भुतसागरः, परिवेषाद्भुतावर्त्तः
34. अद्भुतसागरः, परिवेषाद्भुतावर्त्तः
35. बृहत्संहिता, अ.34 श्लो.11
36. बृहत्संहिता, परिवेषलक्षणाध्यायः, श्लो.16–17,
37. अद्भुतसागरः, परिवेषाद्भुतावर्त्तः
38. बृहत्संहिता, परिवेषलक्षणाध्यायः, श्लो.18,
39. बृहत्संहिता, परिवेषलक्षणाध्यायः, श्लो.12–15,
40. बृहत्संहिता, परिवेषलक्षणाध्यायः, श्लो.19–21,
41. अद्भुतसागरः, परिवेषाद्भुतावर्त्तः
42. भद्रबाहुसंहिता, अ.4, श्लो. 2,
43. भद्रबाहुसंहिता, अ.4, श्लो. 7,8,11,14,20,32
44. अद्भुतसागरः, निर्घाताद्भुतावर्त्तः
45. बृहत्संहिता, अ. 39, श्लो. 1,
46. अद्भुतसागरः, निर्घाताद्भुतावर्त्तः
47. अद्भुतसागरः, निर्घाताद्भुतावर्त्तः
48. बृहत्संहिता, अ. 39, श्लो. 2–5,
49. बृहत्संहिता, सन्ध्यालक्षणाध्यायः, श्लो. 1,
50. महाभारतम् , भीष्मपर्वणि, श्लो.
51. अद्भुतसागरः, सन्ध्याद्भुतावर्तः
52. बृहत्संहिता, संध्यालक्षणाध्यायः, श्लो. 6,30,21,5,26,
53. भद्रबाहुसंहिता, अ.14, श्लो. 79,
54. अद्भुतसागरः, विद्युदद्भुतावर्तः, पृ.576,
55. भद्रबाहुसंहिता, अ.5, श्लो. 19,
56. अद्भुतसागरः, विद्युदद्भुतावर्तः,
57. भद्रबाहुसंहिता, अ. 11, श्लो. 4–6,
58. बृहत्संहिता, गन्धर्वनगरलक्षणाध्यायः, श्लो. 01
59. अद्भुतसागरः, गन्धर्वनगराद्भुतावर्तः, पृ.506,
60. अद्भुतसागरः, विद्युदद्भुतावर्तः, श्लो. 05, पृ.506,
61. अद्भुतसागरः, गन्धर्वनगराद्भुतावर्तः,
62. बृहत्संहिता, अ. 35, श्लो. 01–02,
63. बृहत्संहिता, अ. 35, श्लो. 5 ,
64. अद्भुतसागरः, इन्द्रधनुरद्भुतावर्तः,
65. बृहत्संहिता, अ. 27, श्लो. 3,5,
66. अद्भुतसागरः, वाताद्भुतावर्तः,
67. बृहत्संहिता, अ. 30, श्लो. 33,
68. बृहत्संहिता, अ. 30, श्लो. 32,